This Question Paper consists **35** questions and **4** printed pages.
अस्मिन् प्रश्नपत्रे **35** प्रश्नाः सन्ति। **4** मुद्रितपुटानि च सन्ति।

**Roll No.**
**अनुक्रमाङ्क** | | | | | | | | | | | | |

**Code No.**
**गुढसंख्या** **62/SS/N**

**Set/स्तबकः** **A**

# VEDA ADHYAYAN
# वेदाध्ययनम्
# (345)

**Day and Date of Examination**
**परीक्षादिनं दिनाङ्कश्च** ______________________________

**Signature of Invigilators**
**निरीक्षकयोः हस्ताक्षरम्** **1.** ______________________________

**2.** ______________________________

---

**सामान्य निर्देशा :**

1. अनुक्रमाङ्क : प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गुढसंख्या **62/SS/N-A** नूनं लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# VEDA ADHYAYAN

# वेदाध्ययनम्

# (345)

परीक्षासमयावधिः **(Time)** होरात्रयम् **(3 Hrs)** ] [ पूर्णाङ्काः **(Full Marks)** – **100**

**निर्देशा :** (i) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D]** भागे **5,** इति आहत्य **35** प्रश्नाः सन्ति।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

(iii) समे प्रश्ना अनिवार्याः।

**[A] दशानां युक्तं विकल्पं चिनुत।** **10x1=10**

**1.** ऋग्वेदस्य ऋचां संख्या भवति –

(क) 10000 (ख) 10472 (ग) 11000 (घ) 10572

**2.** पुरुषसूक्तं भवति।

(क) दार्शनिकसूक्तम् (ख) संवादसूक्तम्

(ग) लौकिकसूक्तम् (घ) धर्मनिरपेक्षसूक्तम्

**3.** स नः __________ सूनवेऽग्ने।

(क) पितेव (ख) कन्येव (ग) जायेव (घ) भर्त्तेव

**4.** काण्वशाखा भवति।

(क) यजुर्वेदस्य (ख) शुक्लयजुर्वेदस्य (ग) कृष्णयजुर्वेदस्य (घ) सामवेदस्य

**5.** अग्निर्भवति देवानाम्।

(क) ब्रह्मा (ख) उद्गाता (ग) होता (घ) अध्वर्युः

**6.** पुरुषस्य पद्भ्यामजायत।

(क) ब्राह्मणः (ख) क्षत्रियः (ग) वैश्यः (घ) शूद्रः

7. श्रद्धया __________ समिध्यते।
(क) भानुः (ख) लक्ष्मीः (ग) अग्निः (घ) वह्निः

8. सरमा का भवति।
(क) देवशुनी (ख) मनुष्यशुनी (ग) गन्धर्वशुनी (घ) एकमपि न

9. आमन्त्रितस्य च इति सूत्रं भवति।
(क) षाष्ठिकम् (ख) आष्टमिकम् (ग) उभयविधम् (घ) न एकमपि

10. कतरशब्दः कीदृशः।
(क) अन्तोदात्तः (ख) आद्युदात्तः (ग) मध्योदात्तः (घ) एकमपि न

**[B] दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत।** **10x2=20**

1. वेदानामाविर्भावविषयकः कः मन्त्रः पुरुषसूक्ते प्राप्यते?

2. कृष्णयजुर्वेदस्य कति शाखाः प्राप्यन्ते? तासां नामानि लिखत।

3. ब्राह्मणं नाम किम्? सामवेदस्य कति ब्राह्मणग्रन्थाः?

4. कति पुरुषार्थाः? के च ते?

5. पुरुषसूक्तस्य कः ऋषिः? अत्र कति मन्त्राः सन्ति?

6. वषट्कारस्य उच्चारणं कथं भवति?

7. एकश्रुतिः कुत्र भवति? किं च सूत्रम्?

8. षष्ठ्यन्तस्य कः स्वरः केन सूत्रेण विधीयते?

9. द्विरुक्तस्य पररूपस्य कः स्वरः? स च केन सूत्रेण भवति?

10. धातोः कः स्वरः? धातुस्वरविधायकं सूत्रं किम्?

**[C] दश अनतिदीर्घोत्तरैः समाधत्त।** **10x4=40**

1. कौथुमशाखाराणायणीयशाखयोर्मध्ये काञ्चिदेकामाश्रित्य टीकां लिखत।

2. चत्वारि शृङ्गाः इत्यस्य श्लोकस्य तात्पर्यं लिखत।

3. केनोपनिषदं छान्दोग्योपनिषदं वाश्रित्य टीकां लिखत।

4. अहं रुद्रेभिः इति मन्त्रं पूरयित्वा अर्थं लिखत।

5. अक्षसूक्तानुसारं कितवानां दुर्दशां प्रतिपादयत। अथवा अक्षस्वरूपं प्रतिपादयत।

6. सरमापणिसंवादसूक्तस्य सारं समासतः लिखत।

7. उदात्तस्वरितपरस्य सन्नतरः इति सूत्रस्य व्याख्यां कुरुत।

8. उञ्छादिशब्दानां ससूत्रं स्वरविश्लेषणं कुरुत।

9. प्रत्ययानां स्वरविधायकमधिकारसूत्रं व्याख्यात।

10. अनुदात्तौ सुप्पितौ इति सूत्रं सोदाहरणं विशद्यताम्।

**[D] पञ्च दीर्घोत्तरैः समाधेयाः।** **5x6=30**

1. वेदस्य प्रामाण्यं स्वगिरा प्रतिपादयत।

2. अग्निः पूर्वेभिः इत्यस्य मन्त्रस्य पदपाठं स्वरसाधनं च कुरुत।

3. इन्द्रदेवतायाः स्वरूपं सूक्तानुसारं लिखत अथवा इन्द्रदेवतायाः चरित्रचित्रणं कुरुत।

4. अभ्यस्तानामादिः इति सूत्रं सोदाहरणं व्याख्यात।

5. ञ्नित्यादिर्नित्यम् इति विधिसूत्रं सोदाहरणं व्याख्यात।

- o O o -